प्रकारत्वं समवायेनैवेत्यभिहितं प्रागिति"। लक्षकलक्षणमुक्तं तत्रैव "यादृशार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत्। तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि। यादृशार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत्। सैन्धवादयश्च शब्दास्तुरगादिसम्बन्धिनि लक्षका अपि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धिनीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव। शक्तत्वे पूर्व्वपूर्व्वप्रयुक्तत्वापत्तेः तस्य तद्व्याप्यत्वात् कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वयबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरूढलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च। एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्ध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अपभ्रंशस्यापि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुतापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात्। किञ्चानुभावकत्वं यद्यनुभवस्योपधायकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्ज्जनात् स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्व्वारं तस्याप्याधेयताधर्मिकनीरानुभवं प्रति नीरार्थकनामोत्तरसप्तमीत्वेन तथात्वात् नीराधेयत्वस्य च नीरसम्बन्धित्वानपायात्। ननु वाक्यमपि लक्षकं भवत्येव कथमन्यथा चित्रगुसमुदायस्य लक्षणया चित्रगोस्वामिनां बोधः कथं वा गभीरायां नद्यां घोष इत्यादौ गभीरनदीतीरस्य न हि तत्र नदीपदं तीरलक्षकं गभीरायामित्यस्यानन्वयापत्तेः न हि तीरं गभीरं नापि गभीरपदम्। तथा नद्यामित्यस्यायोग्यतापत्तेः नापि तीरं नदी तस्माद्वाक्यमेव तत्र गभीरनदीतीरलक्षकमिति मीमांसकाः तन्न गभीरायां नद्यामिति विभक्त्यन्तभागस्य तादृक्तीरलक्षकत्वे घोषाद्याधेयत्वेन तदन्वयानुपपत्तेः समासादन्यत्र नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात्। एतेन तादृशतीरवृत्तितायामेव तद्भागस्य लक्षणयापि न निस्तारः तादृशतीरवृत्तेश्च लक्ष्यत्वे घोषादावभेदेन तदन्वयायोगः समासभिन्नस्थले नामार्थयोरभेदान्वये नाम्नोः समानविभक्तिकत्वस्य तन्त्रत्वात्। न च गभीरायां नदीति भागस्यैव तादृक्तीरलक्षकत्वम्। तदर्थे विभक्त्यर्थस्यानन्वयापत्तेर्नहि स भागः प्रकृतिर्येन तदर्थे विभक्त्यर्थस्यान्वयः स्यात् गभीरायां नदीं व्रजेत्यादितोऽपि गभीरनदीतीरकर्म्मकर्त्रादिबोधापत्तेस्तद्भागस्य वाक्यादन्यत्वाच्च तस्माद्गभीरापदं नदीपदं वा तत्र गभीरनदीतीरलक्षकं पदान्तरन्तु तत्र तात्पर्य्यग्राहकमिति सिद्धान्तविदः। चटपटाद्यनुकरणस्य हुंफडादिस्तोभस्य च स्वानुभावकत्वमपभ्रंशानामिव शक्तिभ्रमादेव। गौर्व्वाहीक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न ततोऽभिद्यते"। तस्य विभागोऽपि दर्शितस्तत्रैव। "जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिक्यादिकाः। लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा। काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जगत्स्वार्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादजहत्स्वार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचित् लक्ष्यतावच्छेदकीभूततद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढा यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य। काचिन्न पूर्व्वपूर्व्वं तद्रूपेणाप्रत्यायकत्वादाधुनिकी यथा घटत्वादिना पटादिपदस्य। आदिना शक्यसदृशत्वप्रकारेण बोधकतया गौण्युपगृह्यते यथा अग्निर्माणवक इत्यादावग्निसदृशत्वादिना अग्न्यादिपदस्य। तदेवं विविधलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः। स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेद्धेतुर्भवेदप्युक्तक्रमेण लक्षकाणां विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणाम् अग्नौ शैत्यं स्पृशेदित्यादौ शक्तेन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना सार्द्धमगृहीतासंसर्गकस्यैव सप्तम्यर्थाधेयत्वादेरन्वयबोधप्रविष्टत्वादिति चेन्न प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य सुबर्थाधेयत्वादेर्घोषादावान्वयबोधायोगात्। न च शक्तस्यैव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वात् नान्वयबुद्धौ लक्ष्यार्थस्य प्रवेशः कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यतानुपपत्तेः कुमतिः पशुरित्यादौ लक्ष्यार्थयोर्मिथोऽन्वयबोधस्याप्यानुभविकत्वाच्च तस्माच्छक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः"।